३ ॐ ऐं ह्रीं श्रीं ह्रीं श्रीं सौः क्लीं हुं फट् श्री विरञ्चिबटुक–
श्रीपादुकां पूजयामि तर्पयामि नमः

## पदयुगम्

**विनियोगः–** अथ पदयुग मंत्रस्य दत्तात्रेयो भगवान् ऋषिः अनुष्टुप् छन्दः पदयुगं देवता हं वीजं सः शक्तिः सोऽहं कीलकम् पदयुग प्रीत्यर्थे जपे विनियोगः ।

**करन्यासः–**

ह स क ल ह्रीं अंगुष्ठाभ्यां नमः
ह स क ल ह्रीं तर्जनीभ्यां नमः
ह स क ल ह्रीं मध्यमाभ्यां नमः
ह स क ल ह्रीं अनामिकाभ्यां नमः
ह स क ल ह्रीं कनिष्ठिकाभ्यां नमः
ह स क ल ह्रीं करतलकरपृष्ठाभ्यां नमः
एवं हृदयादि ।

## ध्यानम्

**सिञ्जन्नूपुर पादकङ्कणरणन्मुद्रा सुलाक्षारसा-**
**लङ्काराङ्कित शोभितं पदयुगं श्रीपादुकालङ्कृतम् ।**
**उद्यद्भासि नखैश्च चन्द्रशकलै राजज्जपा संनिभं,**
**ब्रह्मादित्रिदशैः समर्चित पदं मूर्ध्नि स्मराम्यम्बिकाम् ॥**

मंत्रः– ह स क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीप्रकाश पादुकां पूजयामि तर्पयामि नमः । द्वितीय ऋष्यादि ध्यानं पूर्ववदेव ज्ञातव्यम् ।

**मंत्र**: २:– क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्री विमर्श पादुकां पूजयामि तर्पयामि नमः। (दक्षिणाम्नायः)

(इति पदयुगम्)

## (दूती क्रमम्)

**विनियोगः**– अथ नवदूती मंत्रस्य मन्मथ ऋषिः दैवी गायत्री छंदः नवदूत्यो देवता अं वीजं क्लीं शक्तिः आं कीलकम् नवदूती प्रीत्यर्थे जपे विनियोगः।

**न्यासः**– अं आं सौः इति द्विरावृत्या षडङ्गन्यासः।

### ध्यानम्

**दूतयस्तु तथा सर्वा, वरदाऽभय हस्तकाः,**
**योनिमुद्रा च वामे तु, पान पात्रं च दक्षिणे।**
**ध्येया सर्वाश्च कार्यार्थे, नवयोन्यो यथा क्रमम्॥**

**मंत्रः**–

१ अं आं सौः ह्रीं श्रीं सौः श्री योन्यम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

२ अं आं सौः ह्रीं श्रीं सौः श्री योनिसिद्धनाथाम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

३ अं आं सौः ह्रीं श्रीं सौः श्री महायोन्यम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नभः

४ अं आं सौः ह्रीं श्रीं सौः श्री महायोनि सिद्धनाथाम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

५ अं आं सौः ह्रीं श्रीं सौः श्री दिव्य योन्यम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

६ अं आं सौः ह्रीं श्रीं सौः श्री दिव्ययोनि सिद्धनाथाम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

७ अं आं सौः ह्रीं श्रीं सौः श्री शंख योन्यम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

८ अं आं सौः ह्रीं श्रीं सौः श्री शंखयोनि सिद्धनाथाम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

९ अं आं सौः ह्रीं श्रीं सौः श्री पद्मयोन्यम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः
१० अं आं सौः ह्रीं श्रीं सौः श्री पद्मयोनि सिद्धनाथाम्बादूतिका–
श्रीपादुकां पूजयामि तर्पयामि नमः

(इति दूती क्रमम्)

## (मण्डलम्)

**विनियोगः**– अथ मण्डलत्रय मंत्रस्य सोम सूर्याग्नयः ऋषयः गायत्र्युष्णिगनुष्टुप् छंदांसि, सोम सूर्याग्नयो देवता, सं, हं, रं, इति बीजानि, अमृता, तापिनी, धूमार्चिषि शक्तयः आं ईं ऊं कीलकानि, सोम सूर्याग्नि प्रीत्यर्थे जपे विनियोगः।

न्यासः– आं ईं ऊं ऐं औं अः इति सौम्याः,
तां तीं तूं तैं तौं तः इति सौराः।
धां धीं धूं धैं धौं धः इति आग्नेयाः।
स्व स्व करादिन्यासाः।

### ध्यानम्

१– **क्षीरोदार्णव सम्भूतं शशिनं सर्व कामदम्।**
**अमृतेनावृतं नित्यं ध्यायेत्सर्वकलायुतम्॥**
२– **आदित्यं सर्वकर्तारं, कलाद्वादश संयुतम्।**
**पद्महस्तद्वयं वन्दे, सर्व लोकैकसाक्षिणम्॥**
३– **सदा देवीप्रियंरौद्रं, सप्तास्यं सर्वतोमुखम्।**
**वन्दे तं शिखिनं नित्यं, हव्य कव्य वहं सदा॥**

मंत्रः–
१ ह्रीं श्रीं सौः सोम मण्डल श्रीपादुकां पूजयामि तर्पयामि नमः
२ ह्रीं श्रीं सौः क्लीं सूर्य मण्डल–
श्रीपादुकां पूजयामि तर्पयामि नमः
३ ह्रीं श्रीं सौः ऐं अग्नि मण्डल–
श्रीपादुकां पूजयामि तर्पयामि नमः

(इति मण्डलत्रयम्)

## (वीरानुद्व्यष्ट)

**विनियोग:–**

अथ दशवीर मंत्रस्य आनन्दभैरव ऋषि: गायंत्री छंद: दशवीरा देवता ॐ वीजं ह्लीं शक्ति: कं कीलकम् दशवीर प्रीत्यर्थे जपे विनियोग: ।

**न्यास:–**

फां फीं फूं फैं फौं फ: । इति पूर्ववत् न्यास: ।

**ध्यानम्**

**खड्ग खेट धरावीरा, वरदाऽभय हस्तका: ।**
**ध्येया सर्वे महारौद्रा, सर्व विघ्न निवारका: ॥**

**मंत्र:–**

१ ह्लीं श्रीं फट् फां फीं श्रीसृष्टिभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
२ ह्लीं श्रीं फट् फां फीं श्रीस्थितिवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
३ ह्लीं श्रीं फट् फां फीं श्रीसंहारवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
४ ह्लीं श्रीं फट् फां फीं श्रीरक्तवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
५ ह्लीं श्रीं फट् फां फीं श्रीयमवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
६ ह्लीं श्रीं फट् फां फीं श्रीमृत्युवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
७ ह्लीं श्रीं फट् फां फीं श्रीभद्रवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:
८ ह्लीं श्रीं फट् फां फीं श्री परमार्कवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नम:

९ ह्रीं श्रीं फट् फां फीं श्रीमार्तण्डवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नमः
१० ह्रीं श्रीं फट् फां फीं श्रीकालाग्निरुद्रवीरभैरव–
श्रीपादुकां पूजयामि तर्पयामि नमः

(इति वीरान्द्वचष्ट)

## (चतुष्क षष्टि)

**विनियोगः–**

अथ चतुः षष्टि सिद्धा देवता मंत्रस्य सदाशिव ऋषिः दैवी गायत्री छंदः, चतुः षष्टि सिद्धा देवता ऐं वीजं क्लीं शक्तिः सौः कीलकम्, चतुः षष्टि सिद्धा प्रीत्यर्थे जपे विनियोगः ।

**करन्यासः–** ऐं आं अं अंगुष्ठाभ्यां नमः
क्लीं ईं तर्जनीभ्यां नमः
सौः ॐ मध्यमाभ्यां नमः
ऐं ऐं अनामिकाभ्यां नमः
क्लीं औं कनिष्ठिकाभ्यां नमः
सौः अः करतलकरपृष्ठाभ्यां नमः

### ध्यानम्

**मधुपात्र समायुक्ता, बिन्दु मुद्रा विराजिता ।**
**वरदाऽभय हस्ता च, ध्यातव्याः सिद्ध देवताः ॥**

**मंत्र–**

१ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीमंगलानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः
२ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीचण्डिकानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः
३ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीज्येष्ठानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

४ ऐं ह्लीं श्रीं क्ली श्रीं ह्लीं सौः श्रीं ह्लीं श्रीपट्टहानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

५ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीकूर्मानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

६ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीधनदानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

७ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीगंधानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

८ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीमातङ्गानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

९ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीगगनानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१० ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीचम्पकानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

११ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीकैवर्तानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१२ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीमतङ्गगमनानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१३ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीसूर्यभक्ष्यानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१४ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीनभोभक्ष्यानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१५ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीसौतिकानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१६ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीरूपिकानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१७ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीदंष्ट्रापूज्यानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

१८ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीधूम्राक्षानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
१९ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीज्वालानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२० ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीगान्धारानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२१ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीकुल्लुकानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२२ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीमायानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२३ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीमहामायानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२४ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीनित्यानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२५ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीशालानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२६ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीविश्वानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२७ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीकामिनीनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२८ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीउमानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२९ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीश्रियानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३० ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीसुभगानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३१ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीसर्वगानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः

३२ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीलक्ष्मीनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३३ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीगगनेश्वरानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३४ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीविद्यानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३५ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीमीनानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३६ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं अमृतानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३७ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीचन्द्रानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३८ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीसिद्धानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३९ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीश्रद्धानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४० ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीअनन्तानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४१ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीशम्बरानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४२ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीउल्कानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४३ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीत्रैलोक्यानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४४ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीभीमानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४५ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीराक्षसीनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः

४६ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीमणिनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४७ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीप्रचण्डानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४८ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीअनङ्गानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४९ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीविधिनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५० ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीअनभिहितानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५१ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीनन्दिनीनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५२ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीमहामनानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५३ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीसुन्दरीनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५४ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीविश्वेश्वरीनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५५ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीकालनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५६ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीमहाकालनाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५७ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीअभयानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५८ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीविकारानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५९ ऐं ह्लीं श्रीं क्लीं श्रीं ह्लीं सौः श्रीं ह्लीं श्रीमहाविकारानाथा-
श्रीपादुकां पूजयामि तर्पयामि नमः

६० ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीसर्वगानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः
६१ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीसकलानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः
६२ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीपूतनानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः
६३ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीशर्वरीनाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः
६४ ऐं ह्रीं श्रीं क्लीं श्रीं ह्रीं सौः श्रीं ह्रीं श्रीव्योमानाथा–
श्रीपादुकां पूजयामि तर्पयामि नमः

(पश्चिमाम्नायः)

## (मुद्रा) नवकम्

**विनियोगः–**

अस्य श्री मुद्रा चक्रस्य अष्टभैरव ऋषिः अनुष्टुप् छन्दः आनन्दभैरव देवता, ऐं वीजं सौः शक्तिः क्लीं कीलकम् ममाभीष्ट सिध्यर्थे जपे विनियोगः ।

**कराङ्गन्यासः:–**

द्रां द्रीं क्लीं ब्लूं सौः श्रीं बीजैः कराङ्गन्यासः ।

### ध्यानम्

**शूलपात्राऽभय कराः, सर्वाभरण भूषिताः ।**
**सर्वाः शान्तिकरा नित्यं, मुद्राणामधिदेवताः ॥**

**मंत्रः–**

द्रां द्रीं क्लीं ब्लूं सः क्रों ह्‍स्‍ख्‍फ्रें ह्‍स्रौः ऐं मुद्रानवकाय नमः ।

**मंत्राः-**

१ द्रां सर्वसंक्षोभिणी मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
२ द्रीं सर्वविद्राविणी मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
३ क्लीं सर्वाकर्षिणी मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
४ ब्लूं सर्ववशंकरी मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
५ सः सर्वोन्मादिनी मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
६ क्रों सर्वमहाङ्कुशा मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
७ हसखफ्रें सर्वखेचरी मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
८ हस्रौं सर्वबीजा मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः
९ ऐं सर्वयोनि मुद्रायै नमः मुद्राम्बा-
श्रीपादुकां पूजयामि तर्पयामि नमः

नव मुद्राम्बायै नमः

## (वीरावली पञ्चकम्)

**विनियोगः-**

अस्य वीरावली मंत्रस्य ब्रह्म विष्णु रुद्रेश्वर सदाशिव ऋषयः गायत्री छंदः वीरावली देवता लं वं रं यं हं बीजानि सरस्वती महालक्ष्मी उमा गौरी मनोन्मनी शक्तयः सोऽहं कीलकम् वीरावली सिध्यर्थे जपे विनियोगः।

**षडङ्गन्यासः-**

ऐं ह्रीं श्रीं इति द्विरावृत्या न्यासः।

ध्यानम्

ब्रह्मादयश्च पञ्चैते चतुर्भुजसमन्विताः ।
तत्तदायुधसंयुक्ता, ध्यातव्या सर्वसिद्धये ।।

मंत्राः–

१ ऐं ह्लीं श्रीं क्लीं सौः लं ब्रह्मवीरावल्यै नमः–
श्रीपादुकां पूजयामि तर्पयामि नमः

२ ऐं ह्लीं श्रीं क्लीं सौः वं विष्णुवीरावल्यै नमः–
श्रीपादुकां पूजयामि तर्पयामि नमः

३ ऐं ह्लीं श्रीं क्लीं सौः रं रुद्रवीरावल्यै नमः–
श्रीपादुकां पूजयामि तर्पयामि नमः

४ ऐं ह्लीं श्रीं क्लीं सौः यं ईश्वरवीरावल्यै नमः–
श्रीपादुकां पूजयामि तर्पयामि नमः

५ ऐं ह्लीं श्रीं क्लीं सौः हं सदाशिववीरावल्यै नमः–
श्रीपादुकां पूजयामि तर्पयामि नमः

(उत्तराम्नायः)

## (श्रीमन्मालिनिमंत्रराजसहितम्)

विनियोगः–

ॐ अस्य श्री मालिन्यम्बा मंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः मालिन्यम्बा देवता, मातृकाभिः जपे विनियोगः ।

ध्यानम्

पञ्चाशद् वर्ण भेदैः विहित वदनदोः पादयुककुक्षि वक्षो,
देशांभास्वद्कपर्दां कलितशशिकलामिन्दु कुन्दावदाताम् ।
अक्षस्त्रक् कुम्भचिह्नामभयवरकरां त्रीक्षणामब्जसंस्था,
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ।।

नत्वा पूजां विधाय अं---क्षं जप्त्वोत्तर न्यासान् विधाय समर्पयेत् ।

**मंत्रः–**

ॐ ऐं ह्रीं श्रीं ह स क्ष म ल व र यीं श्री मालिनि मूर्तये नमः स्वाहा (ऊर्ध्वाम्नायः)

**मंत्रः–**

ऐं ह्रीं श्रीं ऐं ॐ अ आं इं ईं १६ कं खं गं घं ङं. ३५ हंसः सोऽहं मालिन्यम्बायै नमः श्रीपादुकां पूजयामि तर्पयामि नमः।

**विनियोगः–**

अस्य श्री मंत्रराजमंत्रस्य शरभ ऋषिः गायत्री छंदः मंत्रराजो देवता हां वीजं ह्रीं शक्तिः हूं कीलकम् मंत्रराज प्रीत्यर्थं जपे विनियोगः।

**कराङ्गन्यासः–**

हां ह्रीं हूं हैं हौं हः। इति कराङ्गन्यासः।

**मंत्रः–**

उग्रंवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम्॥

**मंत्रः–**

हां ह्रीं हूं हैं हौं हः हुं फट् स्वाहा मंत्रराज–
श्रीपादुकां पूजयामि तर्पयामि नमः

---

## अथाम्नायाः

### १– (पूर्वाम्नायः)

### १– शुद्धविद्या

**विनियोगः–**

अस्य श्री शुद्धविद्या मंत्रस्य कर्म विपाक सदाशिव ऋषिः गायत्री छंदः श्री शुद्धविद्या दिव्य मनोन्मनी देवता ऐं वीजं ईं शक्तिः औं कीलकम् पशुजन्म विमोचने शुद्धविद्या दिव्य मनोन्मनी प्रसाद सिध्यर्थे जपे विनियोगः।

कर्म विपाक सदाशिव ऋषये नमः शिरसि
गायत्री छन्दसे नमः मुखे
श्री शुद्धविद्या दिव्य मनोन्मनी देवतायै नमो हृदि
ऐं वीजाय नमो नाभौ
ईं शक्तये नमः पादयोः
औं कीलकाय नमः सर्वाङ्गे ।

न्यासौ–

ऐं ईं औं इति द्विरावृत्या कराङ्गहृदयादि न्यासौ ।

**ध्यानम्**

**शुद्धस्फटिकसंकाशां, शुद्धविद्यां मनोन्मनीम् ।**
**पुस्तकं चाक्षमालां च, ज्ञानमुद्रामभीतिकम् ॥**
**धारयन्तीं शिवां वन्दे, पशुपाशविमोचिनीम् ।**
**सर्वमंत्र प्रकाशां च, मातृकारूपमास्थिताम् ॥**
**मनोन्मनीं महाभागां, ध्यात्वा मंत्रं जपेद्बुधः ॥**

इति ध्यात्वा पंचपूजां विधाय ।

मंत्रः–

ऐं ईं औं शुद्धविद्याम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।
उत्तरन्यासान् कृत्वा गुह्याति गुह्येति जपं निवेदयेत् ।

## २– बाला परमेश्वरी

विनियोगः–

ॐ अस्य श्री बाला परमेश्वरी मंत्रस्य दक्षिणामूर्ति ऋषिः पंक्तिः छंदः श्री बाला परमेश्वरी देवता ऐं वीजं सौः शक्तिः क्लीं कीलकम् श्री बाला प्रीत्यर्थे च जपे विनियोगः ।

न्यासः–

मंत्र द्विरावृत्या न्यासः ऋष्यादि न्यासश्च, कराङ्ग हृदयादि न्यासौ बीजत्रयी द्विरावृत्या ।

ध्यानम्

बालार्क मंडलाभासां, चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुश धनुर्बाणान्, धारयन्तीं शिवां भजे ॥

अपरञ्च– आर्द्रेयां शशिखण्ड मंडित जटा–
जूटां नृमुण्डस्रजम् ॥
बन्धूकप्रसवारुणाम्बर धरां
प्रेतासनाध्यासिनीम् ॥
त्वां ध्यायन्ति चतुर्भुजां,
त्रिनयनामापीनतुङ्गस्तनीम् ॥
मध्ये निम्नबलित्रयाङ्कित तनुं,
त्वद्रूपसंवित्तये ॥

शतंजप्त्वा उत्तरन्यासान् विधाय गुह्येति वामेसमर्पयेत् ।
श्री बालाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

---

## ३– द्वादशार्धाम्बा

**विनियोगः–**

अस्य श्री द्वादशार्धाम्बा मंत्रस्य, परमानन्द भैरव ऋषिः गायत्री छंदः, ह स क ल र डैं बीजम् ह स क ल र डौः शक्तिः ह स क ल र डीं कीलकम्, द्वादशार्धाम्बा देवता, श्री द्वादशार्धाम्बा प्रसाद सिध्यर्थे जपे विनियोगः ।

**ऋष्यादिन्यासः–**

ऐं ह्रीं सौः ह्रीं स्त्रीं ह्रीं श्रीं ह्रीं श्रीं ऐं
ऐं ह्रीं सौः ह्रीं स्त्रीं ह्रीं श्रीं ह्रीं श्रीं ऐं ईशानमूर्ध्वे नमः
ह्रीं स्त्रीं क्लीं वामदेव कंदर्प नाभौ नमः
ह्रीं स्त्रीं ह्रीं सौः सद्योजात पादाभ्यां नमः
ह्रीं स्त्रीं ह्रीं सौः तत्पुरुष सर्वांगाय नमः

ह स क्ष म ल व र यूं आं ह स क ल र डैं अंगुष्ठाभ्यां नमः
ह स क्ष म ल व र यूं ईं ह स क ल र डीं तर्जनीभ्यां नमः
ह स क्ष म ल व र यूं ऊं ह स क ल र डौं मध्यमाभ्यां नमः
ह स क्ष म ल व र यूं ऐं ह स क ल र डौं अनामिकाभ्यां नमः
ह स क्ष म ल व र यूं औं ह स क ल र डीं कनिष्ठिकाभ्यां नमः
ह स क्ष म ल व र यूं अः ह स क ल र डैं करतलकरपृष्ठाभ्यां नमः

हुं फट् इति दिग्बन्धः।

### ध्यानम्

द्वादशार्धां महादेवीं, बन्धूक प्रसवारुणां।
पाशांकुशौ धारयन्तीमक्षमालां च पुस्तकम्॥
पुण्ड्रेक्षुचापपुष्पेषु, वरदं चाभयं तथा।
चन्द्रचूडां त्रिनयनां च, पंचवक्त्र विभूषिताम्॥
शिवमंच समासीनां, ध्यायेदानन्द विग्रहाम्॥

इति ध्यात्वा पंचपूजां विधाय मुद्राःप्रदर्श्य–

**मंत्रः–**

ह् स् क् ल र् डैं, ह् स् क् ल र् डीं ह् स् क् ल् र् डौः इति द्वादशार्धाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

### ४– हसन्ती श्यामलाम्बा

**विनियोगः–**

अस्य श्री हसन्ती श्यामला मंत्रस्य मतङ्ग ऋषिः अनुष्टुप् छंदः श्री हसन्ती श्यामलाम्बा देवता ऐं वीजं ह्रीं शक्तिः श्रीं कीलकम् श्री हसन्ती श्यामलाम्बा प्रीत्यर्थे जपे विनियोगः।

**न्यासः–**

बीजत्रयेण द्विरावृत्या न्यासादि कृत्वा ध्यायेत्–

अंगुल्यान्तावलम्बामरुणमणिनिभां कंचुकीं धारयन्ती ।
कादम्बर्या कपालं, नयनत्रय युताकन्दला मन्दहासा ॥
मेघश्यामा मृगांकी, लसित कबरिका पाणिपद्मात्त वेत्रा ।
मातङ्गी सा हसन्ती मम भवतु सदा मंत्र विघ्नोपशान्त्यै ॥

**मंत्रः–**

ॐ ऐं ह्रीं श्रीं ॐ ह्रीं हसन्ती हसितालापे मातङ्गि परिचारिके मम विघ्नापदां नाशं कुरु कुरु ठः ठः ठः हुं फट् स्वाहा ।

शतं जप्त्वा गुह्येति समर्पयेत् ।

हसन्ती अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

## ५– मातङ्गीश्वरी

**विनियोगः–**

ॐ अस्य श्री राजमातङ्गीश्वरी मंत्रस्य महा मातङ्गेश्वर ऋषिः पंक्तिः छन्दः राजमातङ्गीश्वरी देवता ऐं बीजं सौः शक्तिः क्लीं कीलकम् श्री राजमातङ्गीश्वरी प्रीत्यर्थे जपे विनियोगः ।

**न्यासादिः–**

ऐं ह्रीं श्रीं ऐं क्लीं सौः नमो भगवति श्री राज-
मातङ्गेश्वरि अंगुष्ठाभ्यां नमः
सर्वजन मनो हारिणि सर्वमुख रंजनि-
तर्जनीभ्यां नमः ।
क्लीं ह्रीं श्रीं सर्वराज वशंकरि सर्वस्त्रीपुरुष वशंकरि
मध्यमाभ्यां नमः
सर्वदुष्ट मृग वशंकरि सर्वसत्व वशंकरि
अनामिकाभ्यां नमः
सर्वलोक वशंकरि सर्वजनं मे वशमानय
कनिष्ठिकाभ्यां नमः
स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं करतलकरपृष्ठाभ्यां नमः
एवं हृदयादि हुं फट् इति दिग्बंधः ।

### ध्यानम्

ध्यायेऽहं रत्नपीठे शुककलपठितं श्रृण्वतीं श्यामलाङ्गीं,
न्यस्तैकांघ्रि सरोजे शशिशकलधरां वल्लकीं वादयन्तीं ।
कल्हाराबद्धमालां नियमितविलसच्चूलिकां रक्तवस्त्रां
मातङ्गीं भूषितांङ्गीं मधुमदमुदितां चित्रकोद्भासि भालाम् ॥

**मंत्रः-**

ऐं ह्लीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति राज मातङ्गीश्वरि सर्वजन मनोहारिणि सर्वमुखरंजनि क्लीं ह्लीं श्रीं सर्वराज वशंकरि सर्वस्त्रीपुरुष वशंकरि सर्वदुष्ट मृग वशंकरि सर्व सत्व वशंकरि सर्व लोकवशंकरि सर्व जनं मे वशमानय स्वाहा । सौः क्लीं ऐं श्रीं ह्लीं ऐं राज मातङ्गीश्वर्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

### ६– शुक श्यामलाम्बा

**विनियोगः-**

ॐ अस्य श्री शुक श्यामला महा मंत्रस्य शुकर्षिः पंक्तिः छंदः श्री शुको देवता ऐं वीजं ह्लीं शक्तिः श्रीं कीलकम् श्री शुक श्यामला प्रीत्यर्थे जपे विनियोगः ।

**न्यासः-**

ऋष्यादि न्यासं बीजत्रयेण कराङ्ग हृदयादि न्यासश्च ।

### ध्यानम्

निगमसहकारमूले, निर्मितालवालतारवलयान्ते ।
प्रतिफलितागमशाखा, फलरसिकः शुकोस्तु मम तुष्ट्यै ॥

**मंत्रः-**

ॐ ऐं ह्लीं श्रीं ॐ नमो भगवते धन्वन्तरये अमृत कलश हस्ताय महाशुकाय त्रिभुवनालंकाराय राजमद मर्दनाय शीघ्रं राजानं वशमानय स्वाहा ॥ श्री शुक श्रीपादुकां पूजयामि तर्पयामि नमः । उत्तरन्यासादि पूर्ववत् ।

## ७– सारिकाम्बा

**विनियोग:–**

ॐ अस्य श्री सारिका मंत्रस्य शौनक ऋषि: अति जगती छंद: श्री सारिकाम्बा देवता ऐं वीजं ह्रीं शक्ति: श्रीं कीलकम् श्री सारिकाम्बा प्रसाद सिध्यर्थे जपे विनियोग: ।

**न्यास:–**

ऋष्यादिन्यास: बीजत्रयेण कराङ्ग हृदयादि न्यासौ ।

### ध्यानम्

**श्यामां कराम्भोरुहकेलिलग्नां, सोमावतंसांश्रुतिपाठदक्षां ।**
**विद्यातिहृद्यां विशदामुपासे, सारीं चतुःषष्टि कला स्वरूपाम् ।।**

**मंत्र:–**

ॐ ऐं ह्रीं श्रीं ॐ नमो भगवति सारिके, सकल कला कोविदे, मम देवि बोधय बोधय स्वाहा ।

इति शतं जप्त्वा उत्तरन्यासादि कृत्वा पंचपूजां विधाय गुह्येति समर्पयेत् ।

## ८– श्रीवीणा

**विनियोग:–**

अस्य श्री वीणा मंत्रस्य मतङ्ग ऋषि: अनुष्टुप् छंद: श्री वीणा देवता ऐं वीजं ह्रीं शक्ति: श्रीं कीलकम् श्री वीणाप्रीत्यर्थे जपे विनियोग: ।

**न्यासादिकम्–**

बीजत्रयेण द्विरावृत्या ।

### ध्यानम्

**कामगान गुणनाम कल्पना, कल्पशिष्यसरसी परस्परम् ।**
**वेणुकीं स्तनतटे विहारिणीं, वल्लकीं मनसि भावयाम्यहम् ।।**

**मंत्रः–**

ॐ नमो भगवति वीणायै मम सङ्गीत विद्यां प्रयच्छ स्वाहा । इति शतं जप्त्वा समर्पयेत् ।

## श्री वेणुः

**विनियोगः–**

अस्य श्री वेणु महामंत्रस्य मतङ्ग ऋषिः अनुष्टुप छंदः श्री वेणुर्देवता ऐं वीजं ह्लीं शक्तिः सौः कीलकम् श्री वेणु प्रसाद सिध्यर्थे जपे विनियोगः ।

न्यासादि – पूर्ववत् ।

### ध्यानम्

**वक्र सौरभवशीकृत रन्ध्रो,**
**ब्रह्म वाग्वदनशीलन युक्तः ।**
**गान दोहन कला कलनादो,**
**मानदो भवतु मे मणि वेणुः ॥**

इति ध्यात्वा

**मंत्रः–**

ॐ ऐं ह्लीं श्रीं नमो भगवते वेणवे मम साहित्य विद्यां प्रयच्छ स्वाहा ।

शतं जप्त्वा पंचपूजां विधाय गुह्योति समर्पयेत् । केचिदत्र पूर्वोक्तां हसन्तीमपि योजयन्ति ।

## १०. लघु श्यामलाम्बा

**विनियोगः–**

अस्य श्री लघुश्यामला मंत्रस्य मतङ्गभैरवानन्द ऋषिः पंक्तिः छंदः श्री लघुश्यामला देवता ऐं वीजं नमः शक्तिः स्वाहा कीलकम् श्री लघुश्यामला प्रीत्यर्थे जपे विनियोगः ।

न्यासः–

ऐं नमः अंगुष्ठाभ्यां नमः
उच्छिष्ट चाण्डालि तर्जनीभ्यां नमः
मातङ्गि मध्यमाभ्यां नमः
सर्वजन अनामिकाभ्यां नमः
वशंकरि कनिष्टिकाभ्यां नमः
स्वाहा करतलकरपृष्ठाभ्यां नमः

एवं हृदयादि ।

## ध्यानम्

**स्मरेत् प्रथम पुष्पिणीं रुधिरबिन्दुनीलाम्बराम् ।**
**गृहीत मधुपात्रिकां, मद विघूर्ण नेत्रां चलाम् ।।**
**करस्फुरित वल्लकीं, विमल शोभिताटंकिनीम् ।**
**घनस्तनभरालसाम्, गलित चूलिकां श्यामलाम् ।।**

मंत्रः–

ॐ ऐं ह्रीं श्रीं ॐ ऐं नमः उच्छिष्ट चाण्डालि मातङ्गि सर्वजन वशंकरि स्वाहा ।

श्री लघुश्यामलाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

११ मंत्रः–

ऐं ह्रीं श्रीं ह्सैं पूर्वाम्नाय समय विद्येश्वर्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः । श्री गुरुत्रय – गणपति – पीठत्रय पारम्पर्य सहिताय चतुर्विंशति सहस्र परिवार देवता सहिताय कामगिरि पीठाय नमः कामगिरि पीठ श्रीपादुकां पूजयामि तर्पयामि नमः ।

(इति पूर्वाम्नायः)

---

## २– अथ दक्षिणाम्नायः

### १– सौभाग्य विद्याम्बा

**विनियोगः–**

अस्य श्री सौभाग्य विद्या मंत्रस्य आनन्दभैरव ऋषिः दैवी गायत्री छंदः श्री सौभाग्य विद्येश्वरी देवता, ऐं वीजं क्लीं शक्तिः सौः कीलकम् श्री सौभाग्य विद्या प्रीत्यर्थे जपे विनियोगः।

**न्यासः–**

ह स क ल - ह स क ह ल - स क ल ह्लीं ईशानमूर्ध्वे नमः
ऐं क ए ई ल ह्लीं - क्लीं सौः ह स क ह ल ह्लीं सौः सौः स क ल ह्लीं अघोर मन्मथ हृदयाय नमः।
ऐं क्लीं कएईल ह्लीं - क्लीं ह स क ह ल ह्लीं - सौः क्लीं स क ल ह्लीं वामदेव गुह्याय नमः।
ऐं क्लीं सौः क ए ई ल ह्लीं - ह स क ह ल ह्लीं - स क ल ह्लीं सद्योजात पादाभ्यां नमः।
सौः ऐं क ए ई ल ह्लीं ह स क ह ल ह्लीं स क ल ह्लीं तत्पुरुषाय नमः सर्वाङ्गे।
ह स क ल ह स क ह ल स क ल ह्लीं इति लोपामुद्रया मूलाधाराग्निमुद्दीप्य, कामराजेनाधारान्तं नीत्वा, सृष्टि-व्यापकं कृत्वा, अमृतप्लावनेन पूर्णोऽहमिति भावयित्वा।

**करन्यासः–**

ऐं ह्लीं श्रीं ऐं क्लीं सौः ह्लां महा त्रिपुर सुन्दरी सर्वशक्तिधाम्ने, अंगुष्ठाभ्यां नमः
ह्लीं अनित्य त्रिशक्तिधाम्ने तर्जनीभ्यां नमः
ह्लूं अनादि बोधशक्तिधाम्ने मध्यमाभ्यां नमः
ह्लैं स्वतंत्र शक्तिधाम्ने अनामिकाभ्यां नमः
ह्लौं इति अलुप्त शक्तिधाम्ने कनिष्ठिकाभ्यां नमः
ह्लः अनन्त शक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः

एवं हृदयादि ह्लीं भूर्भुवः स्वरोमिति दिग्वंधः

### ध्यानम्

कुंकुमपुंजसमाभां, कुशपाशेक्षु चापपुष्पबाणान् ।
पंकजमध्यनिषण्णां, पंकेरुहलोचनां परां वन्दे ॥

**मंत्रः–**

ऐं क ए ई ल ह्रीं क्लीं ह स क ह ल ह्रीं सौः स क ल ह्रीं श्री सौभाग्य विद्याम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

## २– श्री वगलामुखी

**विनियोगः–**

अस्य श्री वगलामुखी मंत्रस्य नारद ऋषिः अनुष्टुप् छंदः श्री वगलामुखी देवता ह्लीं वीजं स्वाहा शक्तिः वगलामुखीति कीलकम् (मतान्तरेण ॐ कीलकम्) श्री वगलामुखी प्रसाद सिध्यर्थे जपे विनियोगः ।

**न्यासः–**

ॐ ह्लीं अंगुष्ठाभ्यां नमः
वगलामुखि तर्जनीभ्यां नमः
सर्वदुष्टानां मध्यमाभ्यां नमः
वाचं मुखं पदं स्तंभय अनामिकाभ्यां नमः
जिह्वां कीलय कनिष्ठिकाभ्यां नमः
बुद्धि विनाशय ह्रीं ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः
एवं हृदयादिन्यासः ।

### ध्यानम्

चतुर्भुजां त्रिनयनां, कमलासन संस्थिताम् ।
त्रिशूलं पान पात्रं च, गदां जिह्वांच बिभ्रतीम् ॥
बिम्बोष्ठीं कम्बुकण्ठीं च, समपीनपयोधराम् ।
पीताम्बरां मदाघूर्णां, ध्यायेत् ब्रह्मास्त्र देवताम् ॥

मतान्तरेण पीयूषोदधि ---- स्वप्ने पश्यति यान्ति० इति विशेषः ।

पीयूषोदधि मध्य चारु विलसद्रत्नोज्वले मण्डपे,
तर्त्सिहासन मूल पातित रिपुं प्रेतासनाध्यासिनीम् ।
स्वर्णाभां करपीडितारि रसनां भ्राम्यद्गदां विभ्रमां,
स्वप्ने पश्यति यान्ति तस्य विलयं सद्योथ सर्वापदः ॥

इत्थं मुद्राः— त्रिशूलं पान पात्रं च, गदां जिह्वां किरीटकम् ।
कुण्डलं योनिरित्यादि, मुद्राः पीताम्बरा-प्रियाः ॥

प्रदर्श्य पूजां विधाय ।

**मंत्रः—**

ॐ ह्लीं वगलामुखि सर्व दुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धि विनाशय ह्लीं ॐ स्वाहा ।

शतं जप्त्वा उत्तरन्यासान् विधाय समर्पयेत् ।

श्री वगलामुखी ब्रह्मास्त्राम्बा श्रीपादुकां पूजयामि तर्पयामि नमः

## ३— वाराही

**विनियोगः—**

ॐ अस्य श्री वाराही मंत्रस्य धरणीवाराह ऋषिः गायत्री छंदः वाराही देवता ग्लौं वीजं ऐं शक्तिः सौः कीलकम् मम वाराही प्रीत्यर्थे जपे विनियोगः ।

**ऋष्यादिन्यासः—**

ॐ ऐं ग्लौं सौः क्लीं ॐ नमो भगवति वार्तालि वाराहि अंगुष्ठाभ्यां नमः

वाराहमुखि तर्जनीभ्यां नमः

ऐं ग्लौं ऐं अन्धे अन्धिन्यै नमः रुन्धे रुन्धिन्यै नमः मध्यमाभ्यां नमः

जम्भे जम्भिन्यै नमः स्तम्भे स्तम्भिन्यै नमः मोहे मोहिन्यै नमः अनामिकाभ्यां नमः

ऐं ग्लौं सौः सर्व दुष्ट प्रदुष्टानां सर्वेषां वाक्चित्त, चक्षुर्मुख गति-मति- जिह्वास्तम्भं कुरु-कुरु-कनिष्ठिकाभ्यां नमः
शीघ्रं वश्यं कुरु कुरु ऐं ग्लौ ऐं ठः ठः ठः फट् स्वाहा करतल-करपृष्ठाभ्यां नमः

एवं हृदयादि ।

## ध्यानम्

**दंष्ट्रोल्लसत्पोत्रिमुखारविन्दां,**
**कोटीर सम्बद्ध हिमांशु रेखाम् ।**
**नागं कपालं दधतीं कराभ्यां,**
**वामेतराभ्यां मम चेष्ट देवीम् ॥**
**कृष्णांशुकां रक्त वरोत्तरीयां,**
**वाराहि संज्ञां प्रणमामि देवीम् ॥**

**मंत्रः–**

ॐ ऐं ग्लौं सौः ॐ क्लीं नमो भगवति वार्तालि वाराहि वाराह मुखि मुखि अन्धे अन्धनि रुन्धे रुन्धनि स्तम्भे स्तम्भनि मोहे मोहिनि मम सर्व दुष्ट प्रदुष्टानां सर्वेषां वाक्-चक्षुर्मुख गति मति जिह्वा स्तम्भनं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ऐं ठः ठः ठः हुं फट् स्वाहा ।

शतं जप्त्वा उत्तरन्यासादिकं विधाय जपं समर्पयेत् ।

## ४– वटुक भैरव

**विनियोगः–**

अस्य श्री आपदुद्धारण वटुकभैरव मंत्रस्य स्कन्ध ऋषिः अनुष्टुप् छन्दः आपदुद्धारण वटुकभैरवो देवता वं वीजं ह्रीं शक्तिः ह्रीं कीलकम् (हं वीजं ईं शक्तिः रं कीलकम् मतान्तरेण) श्री वटुकभैरव प्रसाद सिध्यर्थे जपे विनियोगः ।

न्यास:–

ॐ ह्रां ॐ ईशानाय मूर्ध्नि नमः
ॐ ह्रीं ॐ तत्पुरुषाय नमो मुखे
ॐ ह्रूं ॐ अघोर मन्मथाय हृदयाय नमः
ॐ ह्रैं ॐ वामदेवाय गुह्याय नमः
ॐ ह्रौं ॐ सद्योजाताय नमः सर्वाङ्गे
ह्रीं वं इत्यनेन षडङ्गन्यासः

### ध्यानम्

**फणि डमरुकांकुश खेट घण्टा नृकपाल भुजंवराऽभयाग्रम् ।**
**मरकतमणि नीलमिन्दुमौलिं वटुक विभुं जटिलं भजे त्रिनेत्रम् ।।**

मंत्र:–

ॐ वं ह्रीं वटुकायापदुद्धारणाय कुरु कुरु वटुकाय ह्रीं श्री वटुक भैरव श्रीपादुकां पूजयामि तर्पयामि नमः ।

## ५– तिरस्करिणी

विनियोगः–

अस्य श्री तिरस्करिणी मंत्रस्य अदृष्या व्यक्त भैरव ऋषिः अनुष्टुप् छंदः श्री तिरस्करिणी देवता श्रीं वीजं ह्रीं शक्तिः क्लीं कीलकम् श्री तिरस्करिणी प्रीत्यर्थं जपे विनियोगः ।

न्यास:–

दीर्घमायया न्यासः ।

### ध्यानम्

**नीलं तुरङ्गमधिरुह्य सुशोभमाना,**
**नीलांशुकाभरण माल्य विलेपनाढ्या ।**
**भिक्षाच्छलेन भुवनानि तिरोदधाना,**
**खड्गायुधा भगवती परिपातु भवतान् ।।**

**मंत्रः–**

ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति महामाये तिरस्करिणि महामाये सकल पशु जन मनश्चक्षु श्रोत्र तिरस्करणं कुरु कुरु स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं श्री तिरस्करिणी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

६ **मंत्रः–**

ऐं क्लिन्ने क्लीं मदद्रवे कुले ह्सौः दक्षिणाम्नाय समय विद्येश्वर्यम्बा भैरवादि सिद्धौघ वटुकत्रय पदयुग सहिताय त्रिशतसहस्र परिवार देवता सहिताय श्री पूर्णगिरि पीठाय नमः।

पूर्णगिरि पीठ श्रीपादुकां पूजयामि तर्पयामि नमः।

---

## ३– पश्चिमाम्नायः

### १– लोपामुद्रा

**विनियोगः–**

ॐ अस्य श्री लोपामुद्रा मंत्रस्य नित्यानन्दभैरव ऋषिः गायत्री छंदः लोपामुद्राम्बिका देवता ह्रीं वीजं ऐं शक्तिः क्लीं कीलकम् (मतान्तरेण ह स क ल ह्रीं वीजं स क ल ह्रीं शक्तिः ह स क ह ल ह्रीं कीलकम्) श्री लोपामुद्राम्बा प्रसाद सिध्यर्थं जपे विनियोगः।

**न्यासः–**

न्यासान् विधाय उभयोर्वीज शक्तिः कीलकान् संयोज्य।

**ध्यानम्**

**वालार्क मण्डलाभासां,**
**चतुर्बाहुं त्रिलोचनाम्।**
**पाशांकुशधनुर्बाणान्,**
**धारयन्तीं शिवां भजे॥**

मंत्रः–

हसकल ह्लीं हसकहल ह्लीं सकल ह्लीं इति पंचदशी मंत्रं जपोत्तरन्यासं विधाय समर्पयेत् ।

श्री लोपामुद्राम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

## २– भुवनेश्वरी

विनियोगः–

अस्य श्री भुवनेश्वरी मंत्रस्य वेदव्यास ऋषिः अनुष्टुप् छंदः भुवनेश्वरी देवता हं बीजं ईं शक्तिः रं कीलकम् श्री भुवनेश्वरी प्रसाद सिध्यर्थं जपे विनियोगः ।

षडङ्गन्यासः–

दीर्घमायया षडङ्गः ।

### ध्यानम्

उद्यत्भास्वत्समाभां, विजितनवजपामिन्दुखण्डावतंसाम् ।
ज्योतिर्मौलिं त्रिनेत्रां, विविधमणिलसत्कुण्डलां पद्मकान्ताम् ॥
हारं ग्रैवेय कांची, गुणमणिवलयां चित्ररूपां वराढ्या ।
मम्वां पाशां कुशाढ्या, सभयवरकरामम्बिकां तां नमामि ॥

पूजां विधाय

मंत्रः–

श्रीं ह्रीं श्रीं (ॐ ह्रीं ॐ)

शत जपोत्तरन्यासान् विधाय समर्पयेत् ।

## ३– अन्नपूर्णा

विनियोगः–

अस्य श्री अन्नपूर्णा मंत्रस्य सदाशिव ऋषिः जगती छंदः अन्नपूर्णा देवता ह्रीं बीजं श्रीं शक्तिः क्लीं कीलकम् अन्नपूर्णा प्रसाद सिध्यर्थे जपे विनियोगः ।

न्यासः–

वीजत्रयेण न्यासः ।

### ध्यानम्

उद्यत्सहस्रद्युति मिन्दु गौरा,
मुत्तुङ्ग पीनस्तन लम्ब हारां ।
माणिक्य दर्वीं मधुपात्र हस्तां,
स्मरन्ति सन्तः स्मरवैरि कान्ताम् ॥ (१)
आदाय दक्षिण करेण सुवर्ण दर्वीं,
दुग्धान्न पूर्ण मितरेण च रत्नपात्रम् ।
अन्नप्रदान निरतां नवहेमवर्णां,
अम्बां भजे कनकभूषण माल्य शोभाम् ॥ (२)

मंत्रः–

ॐ ह्रीं श्रीं क्लीं ॐ नमो भगवति माहेश्वरि अन्नपूर्णे ममाभिलसितमन्नं देहि स्वाहा ।

शतं जप्त्वा उत्तरन्यासं विधाय समर्पयेत् ।

न्यासान्तरमस्यः–

आधारे भुवनेश्वर्यै नमः, हृदये श्री कमलायै नमः, भ्रूमध्ये सुभगायै नमः, ॐ श्री पराविद्यायै नमः, शिरसि-आधार-हृदय-भ्रूमध्य-ब्रह्मरन्ध्रेषु-ब्राह्मै भगवत्यै माहेश्वर्यै, अन्नपूर्णायै, कौमार्यै, वैष्णव्यै, वाराह्यै, स्वाहा रूपायै नमः, इति ब्रह्मरन्ध्र ललाट-भ्रूमध्य वक्त्र हृदय नाभि मूलाधार जानुषु ॐ नमः ब्राह्मै भगवत्यै माहेश्वर्यै अन्नपूर्णायै, कौमार्यै नमो वैष्णव्यै अभिलषितमन्नं इन्द्राण्यै देहि चामुण्डायै स्वाहा महालक्ष्म्यै इति पूर्वस्थानेषु न्यसेत् । मायया च न्यासं विधाय ध्यायेत् ।

## ४– कामकलाम्बा

**विनियोगः–**

ॐ अस्य श्री कामकला मंत्रस्य मन्मथ ऋषिः जगती छंदः कामकला देवता ईं वीजं ह्रीं शक्तिः क्लीं कीलकम् श्री कामकला प्रीतये जपे विनियोगः ।

**न्यासः–**

हकारेण न्यासः ।

### ध्यानम्

**पंकज पाशेक्षु चापमंकुश शाल्यग्रं पंचवाणधरां ।**
**कंकणाऽभय वरहस्तां कलये कामकला धराम्बाम् ।।**

मातृकाक्षराणि अथवा–

**मंत्रः–**

ईं श्री कामकलाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

**मंत्रः–**

ह्सां ह्सीं ह स ख फ्रें भगवत्यम्बे ह स क्ष म ल व र यूं ह स ख फ्रें फ्रें अघोरे अघोरे अघोरमुखि ह्सां ह्सीं किणि किणि विच्चे ह स ख फ्रें ह स ख फ्रीं श्रीं ह्रीं ह्सैं पश्चिमाम्नाय समय विद्येश्वर्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

**मंत्रः–**

श्री दूती मण्डल-वीरदशक चतुःषष्टि सिद्धि सहिताय त्रिशत्सहस्र देवता सहिताय जालंधर पीठाय नमः ।

जालंधर पीठ श्रीपादुकां पूजयामि तर्पयामि नमः ।

(इति पश्चिमाम्नायः ३)

---

## ४– अथोत्तराम्नायः

### १– तुरीयाम्बा

**विनियोगः–**

अस्य श्री तुरीयाम्बा मंत्रस्य महेश्वरानन्द भैरव ऋषिः, उष्णिक् छन्दः तुरीयाम्बा देवता ह्रीं वीजं श्रीं शक्तिः क्लीं कीलकम् तुरीयाम्बा प्रीत्यर्थे जपे विनियोगः ।

**ऋष्यादिन्यासः–**

वीजत्रयेण कराङ्गादि न्यासः ।

### ध्यानम्

**पुन्नागाम्बुज जाति कुन्द वकुलैः पुष्पैरलंकृत तनुं ।**
**तन्वीमिक्षु धनुर्धरांजित जपां श्री पंच वाणान्विताम् ॥**
**कन्यां प्रौढ मदेन भोग निरतां नन्दां तुरीयां शिवाम् ।**
**नादानन्दमयीं प्रणौमि सततं नादात्मिकामम्बिकाम् ॥**

**मंत्रः–**

ह स क ल ह स क ह ल स क ल ह्रीं इति शतं जप्त्वा उत्तरन्यासं विधाय समर्पयेत् ।

### २– महार्धाम्बा

**विनियोगः–**

ॐ अस्य श्री महार्धाम्बा मंत्रस्य जिताकाशानन्दभैरवऋषिः अति जगती छंदः महार्धाम्बिका देवता ऐं वीजं सौः शक्तिः ईं कीलकम् महार्धा प्रीत्यर्थे जपे विनियोगः ।

**न्यासः–**

ऐं ईं सौः संसृष्टि नित्ये स्वाहा अंगुष्ठाभ्यां नमः
हं स्थिति पूर्णे नमः तर्जनीभ्यां नमः

अं ईं महासंहारिणे चण्डकालि फट् मध्यमाभ्यां नमः
हं स्थिति पूर्णे नमः अनामिकाभ्यां नमः
संसृष्टि नित्ये स्वाहा, कनिष्ठिकाभ्यां नमः
क ए ई ल स क ल ह्रीं करतलकरपृष्ठाभ्यां नमः

एवं हृदयादि ।

## ध्यानम्

**आधारे तरुणार्क विम्ब वदने, अत्युग्र दष्ट्रांकुरे ।
वीणावाद नितान्त भोग निलये, वीणादि गान प्रिये ।।
नानावर्ण नरोत्थ सत्कृत शिरः, सुव्यक्त माला धरे ।
श्री विद्येत्वरिते महार्ध सहिते, श्री शांकरीं त्वां भजे ।।**

**मंत्रः–**

ऐं ईं सौः क ए ई ल ह्रीं ह स क ह ल ह्रीं संसृष्टि नित्ये स्वाहा, हं स्थिति पूर्णे नमः, ईं महा संहारिणि कृशे चण्डकालि फट्, एहि शुभे महानखे अनन्त भास्करि चण्डकालि फट्, हं स्थिति पूर्णे नमः, संसृष्टि नित्ये स्वाहा सकल ह्रीं सौः ईं ऐं ।

इति मंत्रं शतं जप्त्वा,

श्री महार्धाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

## अश्वारूढ़ा

**विनियोगः–**

अस्य श्री अश्वारूढ़ा मंत्रस्य स्वच्छन्द भैरव ऋषिः गायत्री छंदः अश्वारूढ़ाम्बिका देवता आं वीजं ह्रीं शक्तिः क्रों कीलकम् अश्वारूढ़ा प्रीत्यर्थे जपे विनियोगः–

**न्यासः–**

ऋष्यादि न्यासं आं ह्रीं क्रों इति द्विरावृत्या कराङ्गन्यासः हृदयादि न्यासौ कृत्वा ।

## ध्यानम्

अश्वारूढ़ां कराग्रे नवकनकमयीं वेत्रयष्टिं दधानां ।
दाक्षिण्येनानयन्तीं स्फुरित तनु लतां पाश हस्तां स्वसाध्याम् ।।
देवीं नित्यप्रसन्नां शशधरशकला बद्धमौलिं त्रिनेत्राम् ।
दद्यान्नित्यानवद्यां श्रियमखिलसुखं-प्राप्ति-हृद्यां श्रियेनः ।।

इति पंचपूजोत्तर न्यासादिकं कृत्वा शतं जप्त्वा समर्पयेत् ।

**जप मंत्रः–** आं ह्रीं क्रों एहि परमेश्वरि स्वाहा,
श्री अश्वारूढ़ाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

## मिश्राम्बा

**विनियोगः–**

अस्य श्री मिश्राम्बा मंत्रस्य सदाशिव ऋषिः गायत्री छंदः श्रीमिश्राम्बा देवता ऐं वीजं ह्रीं शक्तिः क्लीं कीलकम् मिश्राम्बा प्रसाद सिध्यर्थे जपे विनियोगः ।

**न्यासः–**

वाग्भवेन न्यासः ।

## ध्यानम्

ऐंकारे विद्रुमाभे हरिहर परमे, आदि मूल स्वरूपे ।
स्वाहाढ्ये हेमपीठे अमृत सरसृजे अन्नमन्नादि रूपे ।।
ह्रीं कारे शक्तिमूले इह परममये ईक्षणाध्यान रूपे ।
नामाद्ये नादनाथे नव नव महिमे नाद नाथादि मिश्रे ।।

**मंत्रः–**

ऐं मिश्राम्बायै नमः ।
श्री मिश्राम्बा श्रीपादुकां पूजयामि तर्पयामि नमः
शतं जप्त्वा समर्पयेत् ।।

## श्री वाग्वादिनी

**विनियोगः–**

अस्य श्री वाग्वादिनी मंत्रस्य दक्षिणामूर्ति ऋषिः गायत्री छंदः वाग्वादिनी देवता ऐं वीजं ह्रीं शक्तिः सौः कीलकम् वाग्वादिनी प्रसाद सिध्यर्थे जपे विनियोगः।

**न्यासः–**

वीजत्रयेण न्यासः

**ध्यानम्**

**पुस्तक जप वटि हस्ते, वरदाऽभयधारिणि चारु वाहु युगले।**
**कर्पूरामल देहे वागीश्वरि शोधयाशु मम चेतः॥** इति ध्यात्वा

**मंत्रः–**

ऐं ह्रीं सौः वद वद वाग्वादिनि स्वाहा। शतं जप्त्वा समर्पयेत्।

श्री वाग्वादिनी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

**६ मंत्रः–**

खें सः महाचण्ड योगीश्वरी उत्तराम्नाय नव मुद्रा वीरावली युक्ताय द्विसहस्र देवता सहिताय उड्डीयान पीठाय नमः।

उड्डीयान पीठ श्रीपादुकां पूजयामि तर्पयामि नमः

(ॐ ऐं ह्रीं श्रीं ॐ ह स ख फ्रें महाचण्डयोगीश्वरि उत्तराम्नाय विद्येश्वरि कालिका देव्यै नमः)

(इति उत्तराम्नायः)

## (अथोर्ध्वाम्नायः)

### परा प्रसादाम्बा

**विनियोगः—**

अस्य श्री पराप्रसाद मंत्रस्य चिद्रूपानन्द भैरव ऋषिः अति जगती छन्दः श्री परा प्रसाद रूपिणी पराम्बा देवता हं सं वीजं ह्सौः शक्तिः ह्सः कीलकम् श्री पराप्रसाद सिध्यर्थे जपे विनियोगः ।

**न्यासः—**

ह्सामिति न्यासः ।

### ध्यानम्

अमृतार्णव मध्योद्यत् सुवर्ण रुचि शोभिते ।।
कल्पवृक्ष वन संस्थे, नव माणिक्य मण्डपे ।। १ ।।
नवरत्न मये श्रीमत्सिंहासन गताम्बुजे ।।
त्रिकोणे च समासीनं, ज्वलदग्नि समप्रभम् ।। २ ।।
अर्धाम्बिका समायुक्तं, अविभक्त विभूषितम् ।।
कोटि कन्दर्प लावण्यं, सदा षोडश वार्षिकम् ।। ३ ।।
मन्दस्मित मुखाम्भोजं, त्रिनेत्रं चंद्र शेखरम् ।।
दिव्याम्बर स्रगालेपं, दिव्याभरण भूषितम् ।। ४ ।।
पानपात्रं तु चिन्मुद्रां, पुस्तकं च करे लसत् ।।
विद्यां संसदि बिभ्राणे, सदानन्द मुखेक्षणम् ।। ५ ।।
महाषोढोदिताशेष, देवतागण सेविताम् ।।
एवं चित्ताम्बुजे ध्यायेदर्धनारीश्वरं शिवम् ।। ६ ।।
पुरुषं वास्मरेद्देवं, स्त्री रूपंवा समाहितम् ।।
अथवा निष्कलं ध्यायेत् सच्चिदानन्द लक्षणम् ।। ७ ।।

इति ध्यात्वा पंचोपचारैः सम्पूज्य मुद्राः दशकं प्रदर्शयेत् ।

मुद्रा दशकं–

ततः सन्दर्शयेन्मुद्रा, दशकं परमेश्वरि ।
योनिं लिंगं च सुरभिः, हेतु मुद्रा चतुष्टयम् ॥ १ ॥
वनमाला महामुद्रां नभो मुद्रामिति क्रमात् ॥

मंत्रः–

ह्सौः

श्री पराप्रासाद रूपिणी परामबा श्रीपादुकां पूजयामि तर्पयामि नमः ।

## २– परामबा

विनियोगः–

अस्य श्री परामबा मंत्रस्य चिद्रूपानन्द भैरव ऋषिः अति जगती छन्दः श्री परामबा देवता सौः वीजं सौः शक्तिः सौः कीलकम् परामबा प्रीत्यर्थे जपे विनियोगः ।

न्यासः–

पूर्ववत् सामित्यादिना ।

### ध्यानम्

अमृतार्णव मध्योद्यत् रत्नपीठोपशोभिते ॥
कल्पवृक्ष वने संस्थे, नव माणिक्य मण्डपे ॥ १ ॥
पुण्डरीक वने ध्यायेत् दिव्ये देवी मनन्यधीः ॥
पुण्डरीकसमासीनां हिमकुन्देन्दुनिर्मलाम् ॥ २ ॥
सितवस्त्रपरीधानां मुण्डाभरणभूषिताम् ॥
सुधांशुकलितोत्तंससंशोभिमुकुटोचिताम् ॥ ३ ॥
तारुण्यपरिपूर्णाङ्गीं, पीनोन्नतपयोधराम् ॥
मदिराघूर्णितारक्त,नयनत्रयशोभिताम् ॥ ४ ॥
सम्विदानन्द सन्दोह, मन्थरीकृत विग्रहाम् ॥
पानपात्रं च चिन्मुद्रां, दधतीं द्विभुजां शिवाम् ॥ ५ ॥
सदा परमेश्वराकारे, ध्यानस्तिमितलोचनाम् ॥
पंच पंचार पीठस्थं पंचपंचोपसेविताम् ॥ ६ ॥
पंचोपचारिणीं पंचाननसेव्याम् च पञ्चमीम् ॥

इति ध्यात्वा पंचोपचारैः सम्पूज्य पानपात्रं चिन्मुद्रे प्रदर्श्य ।

**मंत्रः—**

सौः इति शतं जप्त्वा समर्पयेत् ।

## ३– परा शाम्भवी

**विनियोगः—**

ॐ अस्य श्री परा शाम्भवी मंत्रस्य––चिद्रूपानन्द ऋषिः अति जगती छंदः पराशाम्भवी देवता ऐं वीजं ह्रीं शक्तिः श्रीं कीलकम् श्री परा शाम्भवी प्रसाद सिध्यर्थे जपे विनियोगः ।

**न्यासः—**

ऐं ह्रीं श्रीं इति वीजत्रयेण षडङ्ग ऋष्यादि न्यासः ।

### ध्यानम्

**माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी ।**
**मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ॥**
**शक्तिः शंकर वल्लभा त्रिनयना वाग्वादिनी भैरवी ।**
**ह्रींकारी त्रिपुरा परापरमयी माता कुमारी ह्यसि ॥**

**मंत्रः—**

ऐं ह्रीं श्रीं ह स ख फ्रें ह्रीं सौः ह स ख फ्रें ह्सौ । इति मंत्रं शतं जप्त्वा समर्पयेत् ।

श्री परा शाम्भवी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

इति ऊर्ध्वाम्नाय मालिनी-मंत्रराज-गुरु मण्डल सहिताय सहस्र देवता परिवारिताय श्री शाम्भवी पीठाय नमः ।

शाम्भवी पीठ श्रीपादुकां पूजयामि तर्पयामि नमः ।

(इति ऊर्ध्वाम्नायः)

——

## २– अथानुत्तराम्नायः

### १– अनुत्तर विद्याम्बा

ह्लीं सौः अं सौः अं आं हुं हुं सौः अः अं सौः अं आं ह्लीं अनुत्तर विद्याम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

### २– महा त्रिपुर सुन्दरी

**विनियोगः–**

अस्य श्री महा त्रिपुर सुन्दरी महा महा भट्टारिका श्री षोडशी विद्या महा मंत्रस्य दक्षिणामूर्ति ऋषिः पंक्तिः छंदः श्री राज राजेश्वरी देवता ह्लीं वीजं श्रीं शक्तिः क्लीं कीलकम् श्री महा त्रिपुर सुन्दरी प्रीत्यर्थे जपे विनियोगः ।

**न्यासौ–**

कराङ्गन्यासौ कादिवत् ।

### ध्यानम्

**सिद्धवृन्दवृतरत्नभूमिका, कल्पवृक्ष मनुवाटि संवृते ।**
**नीप वाटि मणिमण्डपारुणे, चन्द्रभानु शतकोटिभासुरे ॥ १ ॥**
**आदिपंचशिवपादपंचके, मञ्चके परशिवाङ्क पीठिकाम् ।**
**कादिहादि मनु रूपिणीं, सदा भावयामि परदेवतां च ताम् ॥ २ ॥**

**मंत्रः–**

श्रीं ह्लीं क्लीं ऐं सौः ॐ ह्लीं श्रीं क ए ई ल ह्लीं ह स क ह ल ह्लीं स क ल ह्लीं, ह स क ल ह्लीं ह स क ह ल ह्लीं स क ल ह्लीं सौः ऐं क्लीं ह्लीं श्रीं षोडशाक्षरी विद्येश्वर्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

**मतान्तरेण–**

आनन्दभैरव ऋषिः गायत्री छंदः ऐं वीजं क्लीं शक्तिः सौः कीलकम् इति विशेषः ।

## ३– कालकर्षिणी

**विनियोगः–**

अस्य श्री कालकर्षिणी मंत्रस्य सृष्टि स्थिति संहार कारको भैरव ऋषिः अनुष्टुप छन्दः कालकर्षिणी देवता ऐं वीजं ह्रीं शक्तिः श्रीं कीलकम् कालकर्षिण्यम्बा प्रसाद सिध्यर्थे जपे विनियोगः ।

**न्यासः–**

वीजत्रयेण द्विरावृत्या न्यासः ।

**ध्यानम्**

**कपालशूलिनी श्यामा, मदाट्टहासितानना ।**
**श्री कालकर्षिणी पातु, पशुविश्लेषकारिणी ।।**
**जगज्जननरक्षण क्षपणनिग्रहानुग्रहा ।**
**प्रणेतृसमयात्मिका मदकपालशूलायुधा ।।**
**महाट्टहासिताननना, नमितमालनीलाकृतिः ।**
**प्रशस्त पुरुषाकृतिः भवतु कालसंकर्षिणी ।।**

**मंत्रः–**

ॐ संसृष्टि नित्ये स्वाहा, हं स्थिति पूर्णे नमः, ईं महा संहारिणी कृशे चण्ड कालि फट्, रं ह स ख फ्रें महानखे अनन्तभास्करी चण्डिके फट्, ह स ख फें महाचण्ड योगीश्वरी, पंच मंत्र समष्टि रूपिण्यै परमायुषकारिण्यै, काल संकर्षिण्यै नमः ।

**मंत्रः–**

ॐ ऐं ह्रीं श्रीं क्लीं काल कर्षिणी स्वाहा । इति मंत्रं जप्त्वा गुह्येति समर्पयेत् ।

श्री काल कर्षिणी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

(इत्यनुत्तराम्नायः) : ६

अत्र कादि-हादि-गुरु परम्परा योजनीयः ।

## अथ चरण वासना

### परचरण वासना

ऐं ह्रीं श्रीं हंसः शिवः सोऽहं ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीं ह्रीं क्लीं ऐं सौः, ॐ ह्रीं श्रीं क ए ई ल ह्रीं, ह स क ह ल ह्रीं स क ल ह्रीं सौः ऐं क्लीं ह्रीं श्रीं ह स क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं ह्सौः ह स क्ष म ल व र यूं ह्सौः स ह क्ष म ल व र यीं ह्सौः श्रीं ॐ योऽहमस्याऽहमस्मि, ब्रह्माऽहमस्मि, अहमस्मि, ब्रह्मरूपाऽहमस्मि, सोऽहं स्वच्छ प्रकाश परिपूर्ण, परापर महा प्रकाश परिपूर्ण श्रीपादुकां पूजयामि, हंसः शिवः सोऽहं हंसः स्वात्मानन्द नाथ परम हंस परिपूर्णात्मने परात्परतर परमेष्ठि गुरु श्रीपादुकां पूजयामि सः हः सौः हंसः प्रकाश चरणाभ्यां नमः ।

अः हः सोऽहं विमर्श चरणाभ्यां नमः ।

सौः अः सौः अः हंसः सोऽहं आनन्द चरणाभ्यां नमः ।

सौः अः हंसः शिवः सोऽहं ज्योतिपाद चरणाभ्यां नमः ।

(इति चरण वासना)

### श्री विद्या चरण वासना

ऐं क ए ई ल ह्रीं हंसः रक्त चरणाभ्यां नमः ।

क्लीं ह स क ह ल ह्रीं सोऽहं शुक्ल चरणाभ्यां नमः ।

सौः स क ल ह्रीं हंसः सोऽहं रक्तशुक्ल चरणाभ्यां नमः ।

(इति श्री विद्या चरण वासना)

### लोपामुद्रा चरण वासना

ऐं ह्रीं श्रीं ऐं ह स क ल ह्रीं हंसः प्रकाश चरणाभ्यां नमः ।

ऐं ह्रीं श्रीं ऐं क्लीं ह स क ह ल ह्रीं हंसः शिवः सोऽहं विमर्श चरणाभ्यां नमः ।

ऐं ह्रीं श्रीं ऐं ह स क ल ह्रीं क्लीं ह स क ह ल ह्रीं, सौः स क ल ह्रीं हंसः शिवः सोऽहं निर्वाण चरणाभ्यां नमः ।

(इति लोपामुद्रा चरण वासना)

ऐं ह्रीं श्रीं क ए ई ल ह्रीं रक्त चरणाभ्यां नमः ।

ॐ ह स क ह ल ह्रीं सौः शुक्ल चरणाभ्यां नमः ।

ॐ स क ल ह्रीं सौः मिश्र चरणाभ्यां नमः ।

ऐं ह्रीं श्रीं ह स क ल ह्रीं सौः हंसः प्रकाश चरणाभ्यां नमः ।

ॐ ह स क ह ल ह्रीं सौः सोऽहं विमर्श चरणाभ्यां नमः ।

ॐ स क ल ह्रीं सौः सोऽहं विमर्श-प्रकाश चरणाभ्यां नमः ।

ऐं ह्रीं श्रीं कएईल ह्रीं हसकहल ह्रीं स क ल ह्रीं हंसः शिवः सोऽहं सौः निर्वाण चरणाभ्यां नमः ।

ऐं ह्रीं श्रीं क १५ हंसः शिवः सोऽहं चतुष्पथ ज्योतिष्मती चरणाभ्यां नम : ।

ह्सौः शुक्ल विद्या महापीठशुक्ल दुग्धशुक्लाक्षतशुक्ल पुष्प, शुक्लमंडलशुक्ल महापीठशुक्ल मुद्रा, शुक्ल चरण, शुक्ल मंत्र महापीठ शुक्ल नीति, शुक्ल महा प्रकाशानन्द नाथ, ह स ख फ्रें ह्सौः गुरुनाथ श्रीं ह्सौः ।

रक्तविद्या महापीठ रक्तगंध रक्ताक्षत रक्तपुष्प, रक्तमंडल, महापीठ, रक्तचरु रक्तमंत्र महापीठ, रक्तविद्या, रक्तमुद्रा महापीठ, रक्तनीति, महाप्रकाश ह स ख फ्रें ह्सौः श्रीगुरुनाथ श्रीं ह्सौः प्रकाश चरण श्रीं ह्सौः विमर्श चरण श्रीं ह्सौः । प्रकाश विमर्श चरण ऐं क्लीं सौः शान्तानन्दनाथ गुरुनाथ सौः क्लीं ऐं पीठ शतानन्दनाथ-पराम्बा, ॐ ऐं ह्रीं श्रीं सौः उन्मन्यै वौषट् ह्रीं श्रीं ऐं ऐं क्लीं सौः आनन्द चरण ज्योतिष्पाद निर्वाण चरण श्री गुरुनाथ परम शिवानन्दनाथ सदानन्दनाथ प्रज्ञा देव्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः ।

(इति दिव्यौघः)

ऐं ह्रीं श्रीं प्रकाशानन्दनाथ, ऐं ह्रीं श्री चिदानन्दनाथ श्रीपादुकां पूजयामि तर्पयामि नमः ।

श्री गुरुक्रमं पठेद्यस्तु प्रातरुत्थाय भक्तितः।
न्यासार्चन जपादीनामनन्त फलमश्नुते ॥
एतेवै गुरुवः प्रोक्ताः शिवादि स्वगुरु क्रमात्। इति

पूर्वं दक्षिण पश्चिमोत्तर मनुञ्चोर्ध्वं ततोऽनुत्तरं,
स्तोतोद्वन्द्व परं गुरूँश्च चरणान्नवतादि मिश्रान्तकान्।
पञ्चाम्बा नवनाथ षोडश षडाधारं च षडदर्शनम्,
वागाद्यष्टक सप्तविंसति रहस्यान्तान्यसेत्पूजयेत् ॥

पञ्चाम्बा

१ ॐ ऐं ह्लीं श्रीं ह्लीं श्रीं श्री नाथ व्योमातीताम्बा–
श्रीपादुकां पूजयामि तर्पयामि नमः
२ ॐ ऐं ह्लीं श्रीं ह्लीं श्रीं श्री अनादिनाथ व्योमेश्वर्यम्बा–
श्रीपादुकां पूजयामि तर्पयामि नमः
३ ॐ ऐं ह्लीं श्रीं ह्लीं श्रीं श्री अनामयानाथ व्योमगाम्बा–
श्रीपादुकां पूजयामि तर्पयामि नमः
४ ॐ ऐं ह्लीं श्रीं ह्लीं श्रीं श्री अनन्तानन्दनाथ व्योमचरणाम्बा–
श्रीपादुकां पूजयामि तर्पयामि नमः
५ ॐ ऐं ह्लीं श्रीं ह्लीं श्रीं श्री चिदाभासानन्दनाथ व्योमस्थाम्बा–
श्रीपादुकां पूजयामि तर्पयामि नमः

नवनाथाः (सिद्धौघाः)

१ हं उन्मन्याकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
२ सं समनाकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
३ क्षं व्यापिकाकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
४ शं शक्त्याकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
५ वं ध्वन्याकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
६ वं ध्वनिमात्राकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
७ रं अनाहताकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
८ यं द्वन्द्वाकाशनाथ श्रीपादुकां पूजयामि तर्पयामि नमः
९ मं व्यस्ताकाशनन्दनाथ श्रीपादुकां पूजयामि तर्पयामि नमः

## षोडशाधार विद्या

१ ॐ ऐं ह्रीं श्रीं स्वच्छ प्रकाश परिपूर्ण परापर महासिद्ध विद्या कुलयोगिनी मूलविद्या ह्रीं श्रीपादुकां पूजयामि तर्पयामि नमः ।

२ ह्सौः स्वात्मानं वोधय वोधय ह्सौः परा प्रसाद पराम्बा मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

३ ऐं क्लीं क्लिन्ने क्लेदिनि महा मदजल मूल मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

४ हंसः स्वच्छदानन्द परमहंस पर परमात्मने स्वाहा शाम्भवी मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

५ ह्रीं नित्य स्फुरन्ती चैतन्यानन्दमयी महाविन्दु व्यापक मालिनी ऐं कुल निगर्भमातृके ह्रीं समय विमल ग्रीवा सममात्रि स्वरूपमयी ऐं ह्रीं श्रीं ईं हृल्लेखा मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

६ ऐं ह्रीं श्रीं स्वच्छ प्रकाशात्मिका ह्रीं कुल महा मालिनी मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

७ हंसः स्वरूपे प्रकाशात्मिके कुल कुण्डलिनि आज्ञा सिद्धि महा भैरवि आत्मानन्द वोधय अम्विके भगवति ह्रीं पर बोधिनि मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

८ ॐ मोक्षं कुरु कुरु पञ्चाक्षरी मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

९ ह स क ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं चैतन्य त्रिपुरा मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

१० ऐं शुद्ध सूक्ष्म निराकार ब्रह्मस्वरूपिणि क्लीं परानन्द शक्तिः सौः शाम्भवानन्दनाथ अनुत्तर कौलिनीमूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

११ हंसः सोऽहं स्वच्छानन्द परमहंस परमात्मने स्वाहा गुरुक्रम विमर्शिनि मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

१२ अनामाख्य व्योमातीतनाथ परापर व्योमातीत-व्योमेश्वर्यम्बा अनामाख्य मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

१३ ऐं ईं ऊं संकेतसारा मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

१४ ह्रीं भगवति विच्चे वाग्वादिनि क्लीं क्लीं महाह्लदमाया मातङ्गिनि ऐं क्लीं ईं श्री अनुत्तर-वाग्वादिनि मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

१५ ह्लीं श्रीं ह स ख फ्रें ह स क ल रीं सौः श्री अनुत्तरशाङ्करी मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

१६ ह्लीं श्रीं ह स क ल ह स क ह ल सकल ह्लीं श्री महात्रिपुर सुन्दरी, सर्वानन्दमये वैन्दवे चक्रे, परब्रह्म स्वरूपिणि, परमात्म शक्ति, सर्व तंत्रेश्वरि सर्व विद्येश्वरि, सर्व पीठेश्वरि, सर्व वीरेश्वरि सर्व योगेश्वरि, सर्व सिद्धेश्वरि, स क ल जगदुत्पत्तिमातृका, सचन्द्रा, सदेवता, ससमुद्रा, ससिद्धि, सायुधा, सवाहना, सपरिवारा, सशक्ति, सालङ्कारा सर्वोपचारैः सम्पूजिताः सन्तु श्री महात्रिपुर सुन्दरी मूलविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

## (षडाधार)

१ हंसः स्वेच्छानन्द भूत्यै स्वाहा मूलाधार विद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

२ सोऽहं परमहंस विभूत्यै स्वाहा स्वाधिष्ठान विद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

३ हंसः सोऽहं स्वच्छन्दानन्द परम हंस परमात्मने स्वाहा मणिपूर विद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

४ हंसः सोऽहं स्वच्छन्दानन्द चिदानन्द परमहंस-परमात्माने स्वाहा अनाहती विद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

५ हंसः सोऽहं स्वात्मानं वोधय वोधय परमात्मनं वोधय वोधय स्वात्मानन्द नन्दनाथ विशुद्धविद्या श्रीपादुकां पूजयामि तर्पयामि नमः ।

६ हंसः सोऽहं स्वच्छन्दानन्दनाथ चित्प्रकाशामृतहेतवे स्वाहा आज्ञा विद्या श्रीपादुकां पूजयामि तर्पयामि नमः।

७ हंसः शिवः ह्सौः सोऽहं ॐ योऽहमस्मि अहमस्मि ब्रह्माऽहमस्मि, सोऽहं स्वच्छ प्रकाश परिपूर्ण परापर महा प्रकाश परिपूर्णानन्द-नाथ श्रीपादुकां पूजयामि तर्पयामि नमः।

इति आधारविद्या - इति ब्रह्मरन्ध्रविद्या।

**(षड्दर्शनम्)**

१ ब्रह्मदर्शनम्

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यमिति ब्रह्म गायत्री

(पूर्वायतनम्)

२ वैष्णव दर्शनम्

ॐ नमो नारायणाय (दक्षिणायतनम्)

३ सौर दर्शनम्

ॐ घृणिःसूर्य आदित्यः (पश्चिमायतनम्)

४ वौद्ध दर्शनम्

ॐ ह्रीं तारय तारय स्वाहा (उत्तरायतनम्)

५ शैव दर्शनम्

ॐ नमः शिवाय

६ शाक्त दर्शनम्

ॐ श्रीं ह्रीं श्रीं (भुवनेश्वरी अधिष्ठितम्)

**(वाग्देवताष्टकम्)**

१ अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः व्लूं वशिनी वाग्देवता श्रीपादुकां पूजयामि तर्पयामि नमः।

२ कं खं गं घं ङं क्ल्हीं कामेश्वरी वाग्देवता श्रीपादुकां पूजयामि तर्पयामि नमः।

३ चं छं जं झं ञं न्व्लीं मोदिनी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

४ टं ठं डं ढं णं प्लूं विमलाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

५ तं थं दं धं नं ज्म्रीं अरुणाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

६ पं फं बं भं मं ह् स् ल् व् र् यूं जयिन्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

७ यं रं लं वं झ म र यूं सर्वेश्वरी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

८ शं षं सं हं लं क्षं क्ष्म्रीं कौलिनी अम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

——

# पारायण - विधिः

## प्रातः सन्ध्या

मूल मंत्र से आचमन करके मूलमंत्र से ही तीनबार प्राणायाम करें। फिर संकल्प करें। यथा–

ममोपात्त-समस्त दुरितक्षय द्वारा श्री परमेश्वर प्रीत्यर्थं (देश कालौ संकीर्त्य) श्री राज राजेश्वरी प्रीत्यर्थं (देवी मानरीत्या संकल्प) श्री विद्या-प्रातःसन्ध्यामुपासिष्ये।

**श्री नाथादि गुरुत्रयं गणपतिं पीठत्रयं भैरवम्।**
**सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मंडलम्॥**
**वीरान्द्वयष्ट चतुष्कषष्टि नवकं वीरावली पञ्चकम्।**
**श्री मन्मालिनि मंत्रराज सहितं वन्दे गुरोर्मंडलम्॥**

